श्री परमेश्वर स्तुतिः (वसिष्ठ कृतं)

श्री परमेश्वर स्तुतिः (वसिष्ठ कृतं)

लिंगमूर्तिं शिवं स्तुत्वा गायत्र्या योगमाप्तवान् |
निर्वाणं परमं ब्रह्म वसिष्ठोऽन्यश्च शंकरात् || 1 ||

नमः कनकलिंगाय वेदलिंगाय वै नमः |
नमः परमलिंगाय व्योमलिंगाय वै नमः || 2 ||

नमः सहस्रलिंगाय वह्निलिंगाय वै नमः |
नमः पुराणलिंगाय श्रुतिलिंगाय वै नमः || 3 ||

नमः पाताळलिंगाय ब्रह्मलिंगाय वै नमः |
नमो रहस्यलिंगाय सप्तद्वीपोर्ध्वलिंगिने || 4 ||

नमः सर्वात्मलिंगाय सर्वलोकांगलिंगिने |
नमस्त्वव्यक्तलिंगाय बुद्धिलिंगाय वै नमः || 5 ||

नमोऽहंकारलिंगाय भूतलिंगाय वै नमः |
नम इंद्रियलिंगाय नमस्तन्मात्रलिंगिने || 6 ||

नमः पुरुषलिंगाय भावलिंगाय वै नमः |
नमो रजोर्धलिंगाय सत्त्वलिंगाय वै नमः || 7 ||

नमस्ते भवलिंगाय नमस्त्रैगुण्यलिंगिने |
नमोऽनागतलिंगाय तेजोलिंगाय वै नमः || 8 ||

नमो वायूर्ध्वलिंगाय श्रुतिलिंगाय वै नमः |
नमस्तेऽथर्वलिंगाय सामलिंगाय वै नमः || 9 ||

नमो यज्ञांगलिंगाय यज्ञलिंगाय वै नमः |
नमस्ते तत्त्वलिंगाय देवानुगतलिंगिने || 10 ||

दिश नः परमं योगमपत्यं मत्समं तथा |
ब्रह्म चैवाक्षयं देव शमं चैव परं विभो |
अक्षयत्वं च वंशस्य धर्मे च मतिमक्षयां || 11 ||

अग्निरुवाच |
वसिष्ठेन स्तुतः शंभुस्तुष्टः श्रीपर्वते पुरा |
वसिष्ठाय वरं दत्वा तत्रैवांतरधीयत || 12 ||

इत्याग्ने महापुराणे सप्तदशाधिकद्विशततमोऽध्याये वसिष्ठकृत परमेश्वर स्तुतिः ||